# Kartavirya Arjuna MantraH 1

# કાર્તવીર્યાર્જુનમન્ત્રઃ ૧

## Document Information

Text title : Kartavirya Arjuna MantraH 1

File name : kArtavIryArjunamantraH1.itx

Category : deities_misc, mantra

Location : doc_deities_misc

Proofread by : Manish Gavkar

Description/comments : Thanjavur Sarasvati Mahal Series No. 568 kArtavIryArjuna-upAsanA paddhatiH

Latest update : October 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 28, 2025

*sanskritdocuments.org*

# કાર્તવીર્યાર્જુનમન્ત્રઃ ૧

શ્રી ગુરુગણપતયે નમઃ ॥ શ્રીદત્તાત્રેયાય નમઃ ॥

અથ ધ્યાનં પ્રવક્ષ્યામિ શ‍ૃણુધ્વં મુનિપુઙ્ગવાઃ ।
યં નિજધ્યાનમાત્રેણ શત્રવો યાન્તિ સઙ્ક્ષયમ્ ॥ ૧॥

રણાજિરે જયોદગ્રં રણત્કિઙ્કિણિજાલકમ્ ।
જગદ્ધિતાય સંરન્ધં નદજ્જલદનિસ્વનમ્ ॥ ૨॥

મદભ્રમરઝઙ્કારપતદ્ભ્રમરમસ્તકમ્ ।
ક્વણાકનકઘસૃણારુઝણત્કૃતિચમત્કૃતિમ્ ॥ ૩॥

પરિશ્રમણવૈચિત્ર્યજિતત્રિદશસિન્ધુરમ્ ।
ઉદગ્રમણિમાલાક્ષિરુદઞ્ચિમુખમણ્ડલમ્ ॥ ૪॥

અતિપ્રબલશુણ્ડાગ્રવિલગ્નમુસલાયુધમ્ ।
કરિપ્રવરમારુહ્ય ગિરિપ્રતિનિભાકૃતિમ્ ॥ ૫॥

અધિષ્ઠિતમહાસત્વપ્રતિષ્ઠિતજગત્ત્રયમ્ ।
અધિધ્યદૃઢસન્ધાનં ધનુશ્શતમખાનુગમ્ ॥ ૬॥

મુસલાદિ કુઠારાદિ પાશચર્મધરાવૃતમ્ ।
પ્રત્યસ્રં દધતં દેવં સહસ્રવરબાહુભિઃ ॥ ૭॥

નિબદ્ધકવચં દેવં પિનદ્ધીવરબન્ધનમ્ ।
પ્રબુદ્ધસચિવાનીતં પ્રસિદ્ધબલપૌરુષમ્ ॥ ૮॥

પ્રબોધિતજગચ્ચક્રં પ્રવર્ધિતધનાગમમ્ ।
નીલનીરદ સઙ્કાશં નિત્યરામ્બુ-નિભાનનમ્ ॥ ૧૦॥

વિરાજાસક્તનયનં નીલકુઞ્ચિતમૂર્ધજમ્ ।
મહનીયમહાનીલમણિકુણ્ડલમણ્ડિતમ્ ॥ ૧૧॥

રમણીયતરં વીરં વિવિધૈરપિ ભૂષણૈઃ ।

ભુજગાધિપભોગાભભુજમણ્ડલમણ્ડિતમ્ ॥ ૧૨॥

દૃઢપીવરપઞ્ચાસ્યપૃથુકન્દુરમન્દરમ્ ।
કમનીયમણિપ્રોતતપનીયનવસ્રજમ્ ॥ ૧૩॥

તરસા મહિતં દેવં મહસામધિપં જનમ્ ।
નદન્તમિવ કલ્પાન્તે ભવન્તમતિભીષણમ્ ॥ ૧૪॥

વમન્તમિવ કાલાગ્નિં દહન્તમિવ પાવકમ્ ।
કિરન્તમિષુવેષેણ સ્ફુરન્તમિવ ભાસ્કરમ્ ॥ ૧૫॥

કૃતાન્તમિવ નિર્યાતં યુગાન્તરવિપર્યયે ।
મૃગેન્દ્રમિવ ગર્જન્તં તર્જન્તમરિમણ્ડલમ્ ॥ ૧૬॥

ગ્રસન્તમિવ લોકાઙ્ઘ્રિં નુદન્તમતિભીષણમ્ ।
દ્વિષન્તમતિવેગેન નિહન્તં કૃતનિશ્ચયમ્ ॥ ૧૭॥

પ્રચણ્ડતરકોદણ્ડપ્રભિન્નપરસૈનિકમ્ ।
પ્રતપન્તમિવાદિત્યં પ્રચરન્તમિતસ્તતઃ ॥ ૧૮॥

પ્રદહન્તમરીનન્તઃ પ્રવિશન્તમરિન્દમમ્ ।
ક્વચિત્પ્રચણ્ડકોદણ્ડચણ્ડભૈરવનિસ્વનમ્ ॥ ૧૯॥

ક્વચિન્મનોજવોત્તુઙ્ગતુરઙ્ગમમધિષ્ઠિતમ્ ।
ક્વચિદ્રક્તામ્ભુરોચિષ્ણુરથોપરિવિનિષ્ટિતમ્ ॥ ૨૦॥

ક્વચિચ્ચક્રસહસ્રેણ કૃન્તયન્તં ક્રુધા રિપૂન્ ।
કચિચ્છઙ્ખસહસ્રાણાં મોહયન્તં મહારવૈઃ ॥ ૨૧॥

ક્વચિચ્ચર્માસિસાહસ્રવિદારિતવિરોધિનમ્ ।
ક્વચિત્કઠોરસાહસ્રકુઠારાદિવિમર્દનમ્ ॥ ૨૨॥

ક્વચિત્પાશાઙ્કુશધરં ક્વચિન્મુસલધારિણમ્ ।
ક્વચિદાદત્તપરિઘં મર્દયન્તં રિપૂન્ક્રમાત્ ॥ ૨૩॥

રથનાગતુરઙ્ગદિ પતિભિઃ સહસાસિતૈઃ ।
ચોરમારિવિપક્ષાદ્યૈર્દશભિઃ પરિતોવૃતમ્ ॥ ૨૪॥

અઙ્ગૈરપિ સમાયાન્તં નિષઙ્ગેષુ શરાસનૈઃ ।
આસેવિતમનાધૃષ્યં અમલૈરાત્તકઞ્ચુકૈઃ ॥ ૨૫॥

પુરન્દરપરેતેશપાશાયુધધનાધિપૈઃ ।
સમીરણસહાયાગ્રનિરૃત્યનિલશૂલિભિઃ ॥ ૨૬॥

સ્વકાષ્ટાદિગતૈઃ સ્વસ્વવાહનાયુધભૂષણૈઃ ।
ભીષણૈઃ પરિતો વીતં પરસૈન્યવિદારણૈઃ ॥ ૨૭॥

અતિપ્રમાણાકારેણ સઙ્ક્રાન્તાશાન્તમર્જુનમ્ ।
પદત્રિતયસઙ્ક્રાન્તલોકત્રયમિવાચ્યુતમ્ ॥ ૨૮॥

આચિન્ત્ય વિભવં દેવં વિચિન્ત્યૈવં વિભોઃ પદમ્ ।
આમન્ત્ર્ય નિજહૃદ્ધાચ્યાં સ્વમન્ત્રજપમારભેત્ ॥ ૨૯॥

અનુષ્ટુભાણાં મન્ત્રાણાં ઋષિરસ્ય સ્વરસ્ય ચ ।
દત્તાત્રેયોઽપિ ભગવાન્ છન્દોઽનુષ્ટુપ્ ઉદાહૃતમ્ ॥ ૩૦॥

કાર્તવીર્યાર્જુનો વિષ્ણુઃ દેવતા પરિકીર્તિતઃ ।
રક્ષાયૈ વાઞ્છિતાસ્યૈ ચ વિનિયોગોઽરિનિગ્રહે ॥ ૩૧॥

રં ક્ષં યમ્ । કૃતાન્ત ઇવ કલ્પાનાં ગર્જન્જૃમ્ભિતોઽર્જુનઃ ।
અસ્મદ્વિરોધિનામાયુર્હરત્વતિભયઙ્કરઃ ॥ રં ક્ષં યમ્ ॥ ૩૨॥

(મૂલમન્ત્રઃ )
ઠં ક્રોમ્ ॥ આબધ્નામિ દૃઢપાશૈરલમસ્મદ્વિરોધિનમ્ ।
સ્વાદિરે ધ્મે મહત્યગ્નૌ ક્ષિપત્વક્ષરપવિક્રમઃ ॥ ઠં ક્રોમ્ ॥ ૩૩॥

રેં રિમ્ ॥ યુગાન્તઘનનિર્ઘાતનિર્ઝરૈરતિભીષણૈઃ ॥

અસ્મદ્રિપોર્હરત્વાયુરર્જુનઃ શઙ્ખનિસ્વનૈઃ ॥ રેં રિમ્ ॥ ૩૪॥

ધં નુમ્ ॥ ધનુઃ પઞ્ચશતધ્વાનનિર્ગતપ્રાણમારુતમ્ ।
કલ્પાન્તરુદ્રકલ્પોઽસૌ કુર્યાન્મે રાતિભઞ્જનમ્ ॥ ધં નુમ્ ॥ ૩૫॥

સ્વાં લમ્ ॥ મલ્લૈરુલ્લસિતફલૈરુજ્વલદ્ભિઃ વિચેતસમ્ ।
કુર્યાદનાર્યમાર્યસ્મદરાતિં કૃતવીર્યજઃ ॥ સ્વાં લમ્ ॥ ૩૬॥

પ્રોં હુમ્ । સ્વબાહુનિર્ગતૈઃ પઞ્ચશતસઙ્ખ્યૈસ્સિતાશુગૈઃ ।
શિરઃ કૃન્તતુ મચ્છત્રોર્જિતશત્રુગણોર્જુનઃ ॥ પ્રો હુમ્ ॥ ૩૭॥

ક્લીં હ્રીમ્ ॥ અતિતીક્ષ્ણકરૈરુગ્રૈરરિનિગ્રહવિગ્રહે ।
કરવાલૈઃ કરાળાગ્રૈશ્છિન્દ્યાત્ મદરિમર્જુનઃ ॥ ક્લીં હ્રીમ્ ॥ ૩૮॥

ગં આમ્ ॥ ગદાભિરતિભીમાભિરાયસાભિરરિન્દમ ।
સંહારકાલસમ્બન્ધભીમનિર્ઘાતભીષણૈઃ ॥ ગં આમ્ ॥ ૩૯॥

સર સર ॥ મુસલૈઃખલસઙ્ગેઽરિં નિર્દયં મર્દયાર્જુન ।
આયતાભિરનાયાસં હન હેહય ભૂપતે ॥ સર સર ॥ ૪૦॥

યું અમ્ ॥ યુગાન્તો ગમ્ભીરમહાનિર્ઘોષનિષ્ઠુરમ્ ।
અટ્ટહાસૈરરાતિં મે હન હેહય ભૂપતે ॥ યું અમ્ ॥ ૪૧॥

નં સમ્ ॥ સહસ્રકરસાહસ્ર દુસ્સહોદગ્રતેજસે ।
નમસ્તુભ્યં સહસ્રારે હન હેહય મદ્રિપૂન્ ॥ નં સમ્ ॥ ૪૨॥

કરુકાલિ ॥ કાલકણ્ઠગલાકારકરાલાકૃતિમર્જુન ।
કાલિભ્યોઽલિબલિં દદ્યાદસ્મદ્રિપુકલેબરમ્ ॥ ૪૩॥

ઘણ ઘણ ॥ અતિનીલગજારુઢો નિરૂઢામિતવિક્રમઃ ।
આઘટ્ટતુ મમારાતિમર્જુનો નિશિતાંશુકૈઃ ॥ ઘણ ઘણ ॥ ૪૪॥

યું દમ્ ॥ યુગાન્તકર્બુરોદગ્રરોચિષા ચક્ષુષા ત્વયિ ।
દહ દેવ મમારાતિં દહ ભૂયો હરાર્જુન । યું દમ્ ॥ ૪૫॥

ઠં સુમ્ । ગાઢં ગૃહીત્વા કેશેષુ ભ્રામયિત્વાઽતિવેગતઃ ।
પ્રક્ષિપ્યોચ્ચૈવ્યસું ભૂમૌ પાતયારિં મમાર્જુન ॥ ઠં સુમ્ ॥ ૪૬॥

સં હામ્ ॥ ત્વયિ ગર્જિતસઙ્ગ્રામે સંરમ્ભો જૃમ્બતેઽર્જુન ।
બ્રહ્માણ્ડમપિ ભિન્નાણ્ડં ભવેત્કિમરિમણ્ડલમ્ ॥ સં હામ્ ॥ ૪૭॥

નં રોં મમ્ ॥ મધ્યન્દિનદિનાધીશામન્નિરીક્ષ્યાતિ ભીષણઃ ।
ક્ષણેનૈવ મમારાતિં કુર્યાન્નિર્જીવમર્જુનઃ ॥ નં રોં મમ્ ॥ ૪૮॥

ખં ડમ્ ॥ અતિભીષણાનિર્ઘોષો યુધિ નિર્જિતશાત્રવઃ ।
અલમસ્મદરિં કુર્યાદચિરાયુષમર્જુનઃ ॥ ખં ડમ્ ॥ ૪૯॥

નર નર ॥ અવિચારમનાચારમચિરાદચિરાયુષમ્ ।
રચયેદચિરાપાતૈરિષુભિર્મેઽરિમર્જુનઃ ॥ નર નર ॥ ૫૦॥

હં સામ્ । પરચક્રવિનિર્ભિન્નરથચક્રવિમર્દનમ્ ।
મમ શત્રુમિમં હન્યાજ્જિતશત્રુગણોર્જુનઃ ॥ હં સામ્ ॥ ૫૧॥

નાં ષમ્ ॥ કાલમેઘનિભં કાલં કાલકણ્ઠાતિભીષણઃ ।
કાલાયસધનુઃ કાલવશં નયતુ મે રિપુમ્ ॥ નાં ષમ્ ॥ ૫૨॥

ધં ફ્રમ્ ॥ અધિવારણમારુઢો મદવારણાવિક્રમઃ ।
વિદધારુણોઽક્ષોસ્મદરિમારણમર્જુનઃ ॥ ધં ફ્રમ્ ॥ ૫૩॥

મં દમ્ ॥ પરાયુહરણો ઘોરધુરીણમદવારણમ્ ।
નિયોધય મમારાતિં હરણે હેહયેશ્વર । મં દમ્ ॥ ૫૪॥

જં ઞમ્ ॥ ખરકોટિખુરાપાતક્ષિતિરેણુસમુત્થિતૈઃ ।
હયસાદિભિરશ્વૈવ હન મે રિપુમર્જુન ॥ જં ઞમ્ ॥ ૫૫॥

વિં શમ્ ॥ પ્રલયેશ સમાદિષ્ટઃ પ્રમથૈરિવ સદ્ભટૈઃ ।
પરિકૃન્તય મચ્છત્રૂન્ શરણં ભવ મેઽર્જુન । વિં શમ્ ॥ ૫૬॥

ખ્રોં લિમ્ ॥ પ્રાચીમાશ્રિત્ય હરિતં યાતમસ્મદ્વિરોધનમ્ ।
નિહન્યાન્નિશિતૈશ્શસ્ત્રૈશ્ચોરમારીવિભઞ્જનઃ ॥ ખ્રોં લિમ્ ॥ ૫૭॥

જં રિમ્ ॥ દિશા દક્ષિણયા યાદં નિગૃહ્યાસ્મદ્રિપુન્ બલાત્ ।
નિહન્યાદ્ધૃતચાપેષુમહામારીવિભજ્જનઃ ॥ જં રિમ્ ॥ ૫૮॥

ક્રાં ક્રીમ્ । પશ્ચિમયા દિશા યાતપરેતપ્રગ્રહાતિથિમ્ ।
તનોત્વસ્મદ્રિપું ભલ્લૈર્નિગૃહ્યેદરિભઞ્જનઃ ॥ ક્રાં ક્રીમ્ ॥ ૫૯॥

સં ફ્રિમ્ ॥ સૌમ્યાશયા સમાક્રાન્તં સમાક્રાન્તં સુરેશ્વર ।
સમાપયતુ સર્વાયુઃ મદરેઃ સૌમ્યદિક્સ્થિતઃ ॥ સં ફ્રિમ્ ॥ ૬૦॥

રાં લામ્ ॥ ગૃહીતચાપબાણોસૌ બલી દુષ્ટનિબર્હણઃ ।
નિબર્હયતુ મચ્છત્રું મખચ્છકહરિસ્થિતઃ ॥ રાં લામ્ ॥ ૬૧॥

ડં ફ્રુમ્ । દ્વિષન્તં મમ દેવેશ વિશન્તં મારુતાશયાત્ ।
વિશન્તં વિશિખૈરેનં નિહન્યાદુરિતાપહઃ ॥ ડં ફ્રુમ્ ॥ ૬૨॥

શિવાશયા વિવૃદ્ધસ્ય શિતાઙ્કુરશિલીમુખૈઃ ।
શિરશ્છેદય મચ્છત્રોર્મહામાયાવિભઞ્જન ।
ૐ અઃ ॥ ઊર્ધ્વાશયોત્પતિષ્યન્તં મદ્વિષન્તં મહાબલ ।
મહાચક્રેણ વિચ્છિદ્યાન્મહામૃત્યુવિભઞ્જન ॥ ૐ અઃ ॥ ૬૩॥

ઔં ડમ્ । રસારન્ધ્રામપ્યસ્મત્સપત્નમધરાશયા ।
શઙ્ખધ્વાનેન વિધ્વસ્તે સ હન્યાદ્ દુઃખભઞ્જનઃ ॥ ઔં ડમ્ ॥ ૬૪॥

શ્રી દત્તાત્રેયો જયતુ ॥

ઇતિ કાર્તવીર્યાર્જુનમન્ત્રઃ ૧ સમ્પૂર્ણઃ ।

Proofread by Manish Gavkar

---

*Kartavirya Arjuna MantraH 1*

pdf was typeset on October 28, 2025

Please send corrections to *sanskrit@cheerful.com*